&c., नियमवर्त्ती &c., विध्यनुवर्त्ती &c., यथामार्गचारी &c., यथाविधिचारी &c., यथानियमाचारी &c., अव्यभिचारी &c., व्यवस्थितः -ता -तं. —(In due order or course) यथाक्रमः -मा -मं, यथानुक्रमः &c., क्रमिकः -का -कं, क्रमकः &c., सक्रमः -मा -मं, क्रमानुगतः -ता -तं, क्रमानुसारी &c., अनुक्रान्तः -न्ता -न्तं, यथापर्य्यायः -या -यं, पारम्परिकः -की -कं, अनुलोमः -मा -मं, अनुपूर्व्वः -र्व्वा -र्व्वं, आनुलोमिकः -की -कं, अविकलः -ला -लं.—(Periodical) नियतकालिकः -की -कं, नियतः -ता -तं, नित्यः -त्या -त्यं.

REGULARITY, *s.* (Agreeableness to rule) विध्यनुसारः -रिता, नियमानुसारः -रिता, यथाविधिता, सविधिता, नैयमिकत्वं, सूत्रानुसारः -रिता, नियमः, समूत्रता.—(Steadiness in a course, observance of rule) नियमनिष्ठा, विधिनिष्ठा, नियमशीलता, नियमपरता, विध्यनुवर्त्तनं, नियमानुयायिता, नियमानुवर्त्तित्वं, अव्यभिचारः, व्यवस्थितिः *f.*—(Method, regular course) क्रमः, अनुक्रमः, यथाक्रमता, सक्रमता, क्रमिकता -त्वं, यथानुक्रमता, पर्य्यायः, व्यवस्था, व्यवस्थितिः *f.*, परिपाटिः -टी *f.*, पारिपाट्यं, परम्परा, पारम्पर्य्यं, आनुपूर्व्यं, आनुपूर्वी, आनुलोम्यं.—(Regular arrangement) विन्यासः, विन्यसनं, व्यूहनं, व्यूढिः *f.*, रचनं -ना, विरचना.

REGULARLY, *adv.* (According to rule) यथाविधि, विधिवत्, विधितस्, विध्यनुसारेण, विध्यनुरूपेण, यथानियमं, नियमानुसारेण, यथामार्गं, मार्गानुसारेण, यथापद्धति, यथासूत्रं, विधिपूर्व्वं -र्व्वकं.—(Methodically, in due order or course) यथाक्रमं, यथानुक्रमं, सक्रमं, क्रमतस्, क्रमशस्, क्रमेण, क्रमात्, यथापर्य्यायं, पर्य्यायेण, अनुपूर्व्वशस्, आनुपूर्व्येण, शनकैः, शनैः शनैः.

*To* REGULATE, *v. a.* (Adjust by rule) विधिवत् or यथाविधि व्यवस्था in caus. (-स्थापयति -यितुं) or परिकॢप् (c. 10. -कल्पयति -यितुं) or संविधा (c. 3. -दधाति -धातुं) or विधा, यथासूत्रं विधा, सूत्र (nom. सूत्रयति -यितुं), परिमाणं निरूप् (c. 10. -रूपयति -यितुं), परिमा, परिमितं -तां कृ.—(Direct, subject to rules and good management) अनुशास् (c. 2. -शास्ति -शासितुं), समनुशास्, शास्, विनियम् (c. 1. -यच्छति -यन्तुं), नियम्, विधा, संविधा, विधृ (c. 10. -धारयति -यितुं), अनुशासनं कृ.—(Dispose, put in good order) विधा, संविधा, परिकॢप्, व्यवस्था in caus., प्रणी, सम्प्रणी, विन्यस्, विरच्, व्यूह्, व्यवस्थां कृ, नियमं कृ.

REGULATED, *p. p.* व्यवस्थितः -ता -तं, व्यवस्थापितः &c., विनियतः -ता -तं, नियतः &c., नियमितः &c., विहितः &c., अनुशासितः &c., शासितः &c., यन्त्रितः -ता -तं, परिमितः &c., प्रमितः &c., सूत्रितः &c.; 'well regulated,' सुव्यवस्थितः -ता -तं, सुविहितः &c., सुयन्त्रितः &c.; 'ill-regulated,' अव्यवस्थितः -ता -तं, अयन्त्रितः &c; 'having regulated,' विनियम्य.

REGULATION, *s.* (The act of regulating) व्यवस्थापनं, व्यवस्थितिः *f.*, विनियमः, व्यवस्था, अनुशासनं, शासनं, विधानं, संविधानं, परिकल्पनं, विधारणं -णा, यन्त्रणं, प्रणयनं, अनुनयः -यनं.—(Rule) नियमः, विनियमः, विधिः *m.*, विधानं, व्यवस्था, व्यवस्थितिः *f.*, स्थितिः *f.*, सूत्रं, क्रमः, मर्य्यादा.

REGULATOR, *s.* नियन्ता *m.* (न्तृ), विनियन्ता *m.*, अनुशासकः, शासकः, शास्ता *m.* (स्तृ), अनुशास्ता *m.*, विधाता *m.* (तृ), व्यवस्थापकः, परिकल्पकः.

REHEARSAL, *s.* (Repetition of the words of another) पठनं, पाठः, अनुवादः, वाचनं, अनुवाचनं, उल्लेखः -खनं.—(Narration) कथनं, आख्यानं.—(Recital in preparation for the public representation) भाव्यनुकरणं, पूर्व्वाभिनयः -यनं.

*To* REHEARSE, *v. a.* (Repeat the words of another) पठ् (c. 1. पठति -ठितुं), सम्पठ्, अनुवद्, पठनं कृ, अनुवादं कृ.—(Narrate) कथ्, आख्या, श्रु in caus.—(Recite, preparatory to a public representation) भाव्यनुकरणं कृ, पूर्व्वाभिनयं कृ.

REHEARSED, *p. p.* पठितः -ता -तं, अनुवादितः &c., पूर्व्वाभिनीतः -ता -तं.

*To* REIGN, *v. n.* राज्यं कृ, राजत्वं कृ, राज्यपालनं कृ, राज्यशासनं कृ, राज्याधिकारं कृ, राजव्यवहारं कृ, राजकार्य्यं कृ, आधिपत्यं कृ, सिंहासनारूढः -ढा -ढं भू.

REIGN, *s.* राज्यं, राजत्वं -ता, आधिपत्यं.—(Period of rule) राज्यशासनकालः, राज्यकालः, आधिपत्यकालः.—(Prevalence), *see* the word.

REIGNING, *part.* or *a.* राज्यकारी -रिणी -रि (न्), राज्यशासनकारी &c., राज्यारूढः -ढा -ढं, सिंहासनारूढः &c., राजपदारूढः &c., राज्याधिकारी &c.

*To* RE-IMBURSE, *v. a.* प्रतिदा, पुनर् दा, क्षतिपूरणं कृ, हानिपूरणं कृ, निष्कृतिं दा, अपाकृ, प्रतिकृ, प्रत्युपकृ, परिशोधनं कृ.

RE-IMBURSEMENT, *s.* पुनर्दानं, प्रतिदानं, क्षतिपूरणं, हानिपूरणं, परिशोधनं

REIN, *s.* (Of a horse) रश्मिः *m.*, अभीशुः *m.*, अभीषुः *m.*, प्रग्रहः, प्रग्राहः, वसुः *m.*, वागा, वल्गा, दन्तालिका.—(Reins), *see* the word.

*To* REIN, *v. a.* अश्वं रश्मिभिर् यम् (c. 1. यच्छति, यन्तुं) or संयम् or नियम् or निग्रह् (c. 9. -गृह्णाति -ग्रहीतुं) or प्रग्रह्.

RE-INFECT, *a.* अकृतार्थः -र्था -र्थं, असिद्धार्थः &c., अकृतार्थीभूतः &c.

*To* RE-INFORCE, RE-INFORCEMENT. *See To* RECRUIT.

REINS, *s. pl.* (Lower part of the back) कटिः -टी, कटिदेशः, श्रोणिः -णी *f.*, श्रोणिदेशः, कटिपश्चाद्भागः.—(Kidneys), *see* KIDNEY.

*To* RE-INSTATE, *v. a.* पुनः स्था in caus. (स्थापयति -यितुं), प्रतिष्ठा, प्रत्यवस्था, पुनर् अवस्था, पुनर् नियुज् (c. 10. -योजयति -यितुं), पुनः स्थापनं कृ.

RE-INSTATED, *p. p.* पुनः स्थापितः -ता -तं, पुनर् अवस्थापितः &c. or नियोजितः &c.

RE-INSTATEMENT, *s.* पुनःस्थापनं -ना, पुनरवस्थापनं, प्रतिष्ठापनं -ना, प्रत्यवस्थापनं, पुनर्नियोगः, पुनर्नियोजनं.

*To* RE-ITERATE, *v. a.* (Say again) पुनर् वद्, पुनःपुनर् वद्, मुहुर् वद्, अनुवद्, पुनरुक्तिं कृ, आम्रेड्.—(Do again) पुनः कृ, पुनःपुनः कृ, मुहुः कृ, वारं वारं कृ, मुहुर् मुहुः कृ.

RE-ITERATED, *p. p.* पुनःपुनः कृतः -ता -तं, वारं वारं कृतः &c., मुहुर् मुहुः कृतः &c., पौनःपुनिकः -की -कं, पुनरुक्तः -क्ता -क्तं, पुनःपुनरुक्तः &c.

RE-ITERATION, *s.* पुनःपुनःकरणं, मुहुःकरणं, पौनःपुन्यं, पुनरुक्तिः *f.*, पौनरुक्तं, पुनर्वचनं, अनुवादः, आम्रेडनं, समभिहारः.

*To* REJECT, *v. a.* निरस् (c. 4. -अस्यति -सितुं), अपास्, व्युदस्, प्रत्याख्या (c. 2. -ख्याति -तुं), निराकृ, पराकृ, प्रतिक्षिप् (c. 6. -क्षिपति -क्षेप्तुं), विक्षिप्, त्यज् (c. 1. त्यजति, त्यक्तुं), निर्णुद् (c. 6. -णुदति -णोत्तुं), प्रत्यादिश् (c. 6. -दिशति -देष्टुं), अपाहा (c. 3. -जहाति -हातुं), प्रत्याचक्ष् (c. 2. -चष्टे), निर्धू (c. 5. -धूनोति -धोतुं), अपव्यध् (c. 4. -विध्यति -व्यद्धुं), व्यपव्यध्, वृज् (c. 10. वर्जयति -यितुं), अवधीर् (c. 10. अवधीरयति -यितुं), न स्वीकृ, न ग्रह्, अस्वीकारं कृ, अग्रहणं कृ. *See To* REFUSE.

REJECTED, *p. p.* निरस्तः -स्ता -स्तं, अपास्तः &c., व्युदस्तः &c., प्रत्याख्यातः -ता -तं, निराकृतः -ता -तं, पराकृतः &c., प्रतिक्षिप्तः -प्ता -प्तं, निक्षिप्तः &c., विक्षिप्तः &c., प्रत्यादिष्टः -ष्टा -ष्टं, अपविद्धः -द्धा -द्धं, निर्धूतः -ता -तं, अवधीरितः &c., त्यक्तः -क्ता -क्तं, परित्यक्तः &c., वर्जितः &c., अस्वीकृतः &c.

REJECTION, *s.* निरसनं, निरासः, निराकृतिः *f.*, निराकरणं, निकृतिः *f.*, प्रत्याख्यानं, प्रत्यादेशः, प्रतिक्षेपः, त्यागः, परित्यागः, वर्जनं, अपवर्जनं,